दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-85 | 1 | जनवरी 24, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ हेमन्तऋतुः
सूर्यदक्षिणायनम् माघ कृष्णपक्ष दशमी
तिथिः माघ 10 प्रविष्टांशः मङ्गलमयः भवेत्

2 मुख्यमन्त्री ढगवार-दुग्धप्रसंस्करण-संयन्त्रस्य आधारशिलां स्थापितवान्

3 कतिपयेषु क्षणेषु भविष्यति कर्करोगस्य चिकित्सा, स्विटजरलैण्डस्य वैज्ञानिकैः अल्ट्रा फास्ट् रेडियोथेरेपी इति विकसिता

4 श्रीरामायणकथा, उत्तरकाण्डम्! (षट्पञ्चाशत्तमः सर्गः) इलोपाख्यानम्। (तृतीयः खण्डः)

## महाकुम्भे राष्ट्रिय स्तरस्य खादी-प्रदर्शनी अभ्यागतान् आकर्षयति



हिमसंस्कृतवार्ताः। उत्तरप्रदेशस्य प्रयाग्राज-नगरस्य महाकुम्भ-क्षेत्रे राष्ट्रिय स्तरस्य खादी-प्रदर्शनी अभ्यागतान् आकर्षयति। अस्मिन् वर्षे महाकुम्भ-नगरे विद्यमानम् खादी-इण्डिया इत्यस्य शिविरम्, स्थानीय-शिल्पेषु, वस्त्रोद्योगेषु, स्वदेशीय-उद्यमेषु च भारतस्य समृद्धां परम्परां प्रदर्शयति,यद्धि खादी-विषये केन्द्रितम् अस्ति। मंडपम् परम्परायाः, सुस्थिरतायाः, शिल्पकौशलस्य च एकीकरणं प्रकाशयति, येन एकतायाः प्रोत्साहने, सांस्कृतिकमूल्यानां संरक्षणे च खादी इत्यस्य भूमिकायाः विषये गहनदृष्टिं प्रददाति । महा-कुम्भ-मेलायाः ऐतिहासिक-पृष्ठभूमौ स्थापितं एतत्, स्थानीय-उद्योगानां, सुस्थिर-आचरणानां च प्रोत्साहनाय भारतस्य प्रतिबद्धतां प्रकाशयति। आहत्य सार्धेकशताधिकानि विक्रयकेन्द्राणि विशेषतया स्थापितानि सन्ति, येषु अष्टनवतिः केन्द्राणि विशेषतः खाद्युत्पादानां, चतुर्पञ्चाशच्च ग्रामोद्योग-उत्पादानां कृते सन्ति । अस्यां प्रदर्शन्यां काश्मीरतः तमिल्नाडु पर्यन्तं, महाराष्ट्रतः नागालैण्ड्-पर्यन्तं भारतस्य विंशतितोधिकानां राज्यानां उत्पादनानि दृश्यन्ते ।

## मौनी अमावस्यायाः शुभावसरे सार्थैकशताधिकानां विशिष्ट-रेलयानानां प्रचालनस्य व्यापकयोजना अस्ति

हिमसंस्कृतवार्ताः। प्रयागराज-रेलवे-प्रखण्डेन मौनी अमावस्यायाः शुभावसरे महाकुम्भ-क्षेत्रे अत्यधिकसंख्यायां समागन्तुकामानां भक्तानां समायोजनाय सार्थैकशताधिकानां विशिष्ट- रेलयानानां प्रचालनस्य व्यापकयोजना निर्मिता अस्ति । एतानि विशिष्टरेलयानानि प्रयागराजस्य सर्वैः नवरैलस्थानकैः दिशानुसारं संचालिष्यन्ते, येन श्रद्धालूनां भक्तानां सुगमा यात्रा सुनिश्चिता भविष्यति ।

## गणतन्त्रदिवसस्य अवसरे षडविंशतिः प्रदर्शनन्याः भविष्यन्ति., स्वर्णिम भारत , विकास और विकासः इति ध्येयवाक्यम् अस्ति



गणतन्त्रदिवसस्य पथसञ्चलनस्य सज्जता प्रचलति। डीआरडीओ पथसञ्चलनमध्ये रक्षाकवचस्य विषये आधारितं सारणीं प्रदर्शयिष्यति। अस्मिन् गणतन्त्रदिवसस्य अवसरे षडविंशतिः प्रदर्शनन्याः भविष्यन्ति., स्वर्णिम भारत , विकास और विकासः इति ध्येयवाक्यम् अस्ति। अस्मिन् राष्ट्रियसुरक्षासम्बद्धानि कार्याणि नवीनतानि च प्रदर्शितानि भविष्यन्ति। यदा तस्मिन् चित्रे हौवित्जर-तोपः प्रदर्शितः भविष्यति, तत्र देशस्य शत्रुणां प्रतिकारार्थं निर्मिताः लेजर-शस्त्राणि अपि प्रदर्शितानि भविष्यन्ति । डीआरडीओ इत्यनेन तालिकायाः सज्जता सम्पन्ना अस्ति । गणतंत्रदिवसस्य परेडस्य डीआरडीओ इत्यस्य रक्षाकवच-विषयकस्य तालिकायां पृष्ठतः वायुपर्यन्तं क्षेपणास्त्राः, वायुवाहन-सचेतना-नियन्त्रण-प्रणाल्याः, कैल-एडवांस्ड टोड्-आर्टिलरी-गन-प्रणाली, ड्रोन्-परिचयः, अवरोधन-विनाश-प्रणाली, उपग्रहाधारिता-सुरक्षा च दृश्यन्ते। मध्यशक्त्या रडारः अरुधरा, भाररहिता टार्पीडो, इलेक्ट्रॉनिकयुद्धप्रणालीयुक्तं धर्मशक्तिः, लेजर-आधारित-शक्ति-शस्त्र, लघु-दूरयुता-वायु-रक्षा-प्रणाली, स्वदेशीय-सुरक्षितः उपग्रहचलदूरवाणी, अस्साल्ट्-राइफल इत्येतादृशानि शस्त्राणि प्रदर्शितानि भविष्यन्ति।। पथसंचलनं विजयचौकतः आरभ्य कार्तव्यमार्गेण लालदुर्गं प्रति गमिष्यति।

## 27 जनवरीतः अल्पसङ्ख्यककार्यमन्त्रालयः द्वितीयलोकसंवर्धनपर्वस्य आयोजनं करिष्यति

हिमसंस्कृतवार्ताः। अल्पसङ्ख्यककार्यमन्त्रालयः द्वितीयलोकसंवर्धनपर्वस्य आयोजनं करिष्यति। लोकसंवर्धनपर्वः अस्य मासस्य सप्तविंशतिः दिनाङ्कतः अग्रिममासस्य द्वितीय-दिनाङ्कपर्यन्तं नवदेहल्यां भविष्यति। अस्मिन् कार्यक्रमे देशस्य विभिन्नेषु भागेषु स्थिताः प्रायः नवतिः कलाकाराः स्वकलायाः शिल्पकलायाश्च प्रदर्शनं करिष्यन्ति इति मन्त्रालयः एकस्मिन् वक्तव्ये अवदत्। एतेषु महाराष्ट्रस्य अज्रक्-मुद्रित-शाटिकोत्तरीयम्, उत्तरप्रदेशस्य बनारस्-ब्रोकेड्, असम- राज्यस्य वेतः वेणुः च, कर्नाटकस्य चन्नापटना-क्रीडनकानि च, पश्चिमवङ्गस्य कन्था-सीवनञ्च अन्तर्भवन्ति। मन्त्रालयः इत्यपि अकथयत् यत् षोडशसंख्यकाः पाकशास्त्रविदः आगंतुकान् भारतस्य विविधान् स्वादान् आस्वादयितुं अवसरं प्रदास्यन्ति इति। अल्पसङ्ख्यकानां समुदायानां समृद्धां सांस्कृतिकपरम्परां प्रदर्शयन्तः शुक्रवासरतः रविवासरपर्यन्तं सांस्कृतिक- प्रदर्शनानि अपि आयोज्यन्ते

## संयुक्तराज्यामेरिकां समेत्य विदेशेषु निवसतां अवैध- भारतीयानां वैध-प्रत्यागमनविषये भारतस्य स्थितिः स्पष्टा अस्ति- विदेश-मन्त्री डा. जयशङ्करः

हिमसंस्कृतवार्ताः। विदेश-मन्त्री डा. जयशङ्करः अवदत् यत् संयुक्तराज्यामेरिकां समेत्य विदेशेषु निवसतां अवैध- भारतीयानां वैध-प्रत्यागमनविषये भारतस्य स्थितिः स्पष्टा अस्ति। सः प्रोक्तवान् यत् भारतं तेषां पुनरागमनस्य स्वागतसमर्थनं करोति । ह्यः वाशिङ्ग्टन् डी. सी. इत्यत्र सः अकथयत् यत् भारतं विधि-चलनशीलतायाः दृढतया समर्थनं करोति, कुशलाः प्रतिभाशालिनः च भारतीयाः वैश्विकरूपेण उत्तमान् अवसरान् प्राप्नुयुः इत्यपि इच्छति। भारत-अमेरिका-देशयोः मध्ये दृढसम्बन्धं प्रकाशयन् डा. जयशङ्करः सबलं प्रोक्तवान् यत् द्वयोः राष्ट्रयोः मध्ये विश्वासस्य अभिसरणस्य च स्तरः अतीव प्रबलः अस्ति । सः इदमपि रेखांकितम् अकरोत् यत् द्वावेव देशौ वैश्विक कल्याणस्य भावनां निभालयतः, द्वैपाक्षिकसहभागित्वस्य निर्माणं कुर्वन्तौ स्वराष्ट्रहिताय च प्रतिबद्धौ स्तः इति।

## सुभाषितम्

**प्राणिनामवधस्तात! सर्वज्यायान् मतो मम।**
**अनृतां वा वदेद्वाचं न तु हिंस्यात कथंचन्।।**
**(महाभारत, कर्णपर्व**

हिन्द्यर्थः-हे तात! मेरे विचार से प्राणियों की हिंसा न करना ही सबसे श्रेष्ठ धर्म है। किसी की प्राणरक्षा के लिए असत्य भी बोलना पड़े तो बोल दें, किन्तु उसकी हिंसा किसी तरह न होने दें।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्र प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## इण्डोनेशिया-मास्टर्स-इति प्रतियोगितायां लक्ष्यसेनस्य पराजयः

हिमसंस्कृतवार्ताः। इण्डोनेशिया-मास्टर्स उत्तम-पञ्चशताख्यायां वैडमिण्टन्-प्रतियोगितायां जकार्ता-नगरे पुरुष-एकल-स्पर्धायाः द्वितीये चरणे भारतस्य शीर्षस्थः क्रीडकः लक्ष्यसेनः जपान्-देशस्य केण्टा निशिमोतो इत्यनेन पराजितोऽभवत्। सेनः प्रथमचक्रे षोडश-एकविंशतिः इत्यङ्कः पराजयत, पुनः द्वितीयचक्रं एकविंशतिः- द्वादशाङ्कः विजितवान्, परन्तु तृतीयचक्रम् त्रयोविंशतिः-एकविंशतिः अर्कैः पराजयत। मिश्रयुगलेन सह महिला-सिङ्गलस्-क्रीडायाञ्च, पि. वि. सिन्धु इत्यस्याः अभियानारम्भोऽपि निराशाजनकः आसीत्, सा वियतनाम्-देशस्य T.L. नवेन इत्येतां विरुध्य प्रारम्भिक चरण-स्पर्धायां पराजिता अभवत्।

# मुख्यमन्त्री ढगवार- दुग्धप्रसंस्करण- संयन्त्रस्य आधारशिलां स्थापितवान्




हिमसंस्कृतवार्ताः- काङ्गड़ा। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः गुरुवासरे ढगवारे २२५ कोटिरूप्यकाणां दुग्धप्रसंस्करणसंयंत्रस्य शिलान्यासं कृतवान्। संयंत्रस्य २० प्रतिशतं कार्यं सम्पन्नम् अस्ति। एतद् संयंत्रम् ५.५ एकड़भूमौ निर्मीयते। अस्मिन् हमीरपुर- चम्बा- काङ्गड़ा- मण्डलानां दुग्ध-उत्पादकानां दुग्धं संगृह्य प्रसंस्करणाय आनयिष्यते।

आधारशिलास्थापनानन्तरं मुख्यमन्त्री संयंत्रस्य निर्माणकार्यस्य वृत्तान्तं स्वीकृतवान्। अस्मिन्नवसरे पशुपालनमंत्री चन्द्रकुमारः, राज्य- योजना- आयोगस्य उपाध्यक्षः भवानी पठानिया, उपमुख्यसचेतकः केवलसिंहः पठानिया, विधायक आशीषबुटेलः, सुदर्शनः बबलू, मुख्यमन्त्रिणः सूचना-प्रौद्योगिकी परामर्शकः गोकुलबुटेलः, पूर्वसांसद विप्लवठाकुर, अध्यक्षः रामचंद्रपठानिया, पूर्वकांग्रेसप्रत्याशी धर्मशाला देवेन्द्र जग्गी, धर्मशाला नगरनिगमस्य महापौरः नीनु शर्मा, एपीएमसी- कांगड़ा-अध्यक्षः नीशु मोंगरा आदयः उपस्थिता अभवन्।

# CM Sukhu: यावत् काङ्ग्रेसः सत्तायां वर्तते तावत् ओपीएस इति निरन्तरं भविष्यति

हिमसंस्कृतवार्ताः- धर्मशाला। कांगड़ाजनपदस्य धर्मशालाविधानसभाक्षेत्रस्य दाड़ीमेलाप्राङ्गणे मुख्यमन्त्री सुखविंदरसिंहसुक्खुः विशालजनसभां संबोधितवान्। सः १५० कोटिरूप्यकाणां व्ययेन तपोवनसमीपे देशस्य बृहत्तमं अन्ताराष्ट्रीयसम्मेलनकेन्द्रं निर्मातुम् उद्घोषितवान्। सः अवदत् यत् अस्मिन् सम्मेलनकेन्द्रे बृहत्प्रमाणेन संगोष्ठीनां आयोजनं भविष्यति येन पर्यटनक्रियाकलापाः वर्धन्ते, स्थानीययुनां कृते जीविकायाः अवसराः च सृजिताः भविष्यन्ति। मुख्यमन्त्री प्राथमिकस्वास्थ्यकेन्द्रस्य योल कैन्ट इत्यस्य परिचालनकरणम्, आईटीपार्क इत्यत्र सेतुनिर्माणार्थं धनम्, ओबीसी भवनस्य निर्माणं सम्पन्नं कर्तुं पर्याप्तं धनं आवंटनं, मार्गनिर्माणपरियोजनानां च घोषणां कृतवान्। एतेषु झियोलविद्यालयतः अञ्जनी माता, परोलतः घियानाखुर्द बड़ाखोला, कुफरीतः चामुण्डा मन्दिरम्, अलखनीतः जयुलकण्ड करड़ियाना, कनेडतः झखरेहड़, चेलियांतः पासु, टीकातः बनी तथा लुंटा- बगोटू- खबरोट- टिल्लू मार्गनिर्माणपरियोजनाः सन्ति। सः अवदत् यत् वर्तमानराज्यसर्वकारेण भ्रष्टाचारविषये शून्यसहिष्णुतानीतिः स्वीकृता अस्ति यदा तु पूर्वभाजपासर्वकारस्य कार्यकाले धनिकदरिद्रयोः मध्ये अन्तरं अधिकं वर्धितम्। सर्वकारीयकार्यस्य निविदाकरणं कृतम् इति कथ्यते। पूर्वभाजपासर्वकारकाले पुलिसभर्तीघोटाला युनां प्रति विश्वासघातः आसीत्। वर्तमान राज्यसर्वकारः पारदर्शितां सुनिश्चितं कुर्वन् अस्ति। जलशक्तिविभागस्य ठियोग- उपमण्डले अनियमितानां गम्भीरानुसन्धानं प्रारब्धम् अस्ति तथा च भ्रष्टाचारप्रथानां विरुद्धं कठोरकार्यविधिः क्रियते। सः अवदत् यत् भाजपासर्वकारेण राज्यकोषस्य दुरुपयोगः राजनैतिकलाभानां कृते कृतः, यदा तु काङ्ग्रेससर्वकारः सामान्यजनानाम् लाभाय दृढ़प्रयत्नान् करोति।

मुख्यमन्त्री उक्तवान् यत् काङ्ग्रेससर्वकारेण पुरातनवृत्तियोजनां (ओपीएस) १.३६ लक्षं सर्वकारीयकर्मचारिणां कृते पुनः स्थापयित्वा निर्वाचनप्रतिज्ञा पूर्णा कृता। यावत् राज्ये काङ्ग्रेससर्वकारः सत्तां प्राप्नोति तावत् कर्मचारिणां कृते ओपीएस इति निरन्तरं भविष्यति। सः अवदत् यत् केन्द्रसर्वकारेण राज्यस्य ऋणस्य सीमां १६०० कोटिरूप्यकाणां न्यूनीकरणं कृत्वा राज्यसर्वकारस्य ओपीएस-पुनर्स्थापनस्य निर्णयं दृष्ट्वा राज्ये अतिरिक्तप्रतिबन्धाः अपि स्थापिताः। सः अवदत् यत् एनपीएस- अन्तर्गतं प्रायः ९००० कोटिरूप्यकाणि अद्यापि केन्द्रसर्वकारस्य पार्श्वे सन्ति, केन्द्रसर्वकारः यूपीएस-कार्यन्वयनाय राज्ये प्रभावं जनयति।

मुख्यमन्त्री उक्तवान् यत् केन्द्रसर्वकारेण राज्यस्य आपदाग्रस्तक्षेत्राणां कृते पीडीएनए न निर्गतं तथा च राज्यसर्वकारस्य विशेषाश्रयसंकुलस्य याचना अपि नाङ्गीकृता। अस्मिन् संकटकाले राज्यस्य भाजपानेतारः प्रभावितपरिवारैः सह स्थातुं स्थाने आपदः राजनीतिकरणं कुर्वन्ति स्म। राज्यसर्वकारः राज्यस्य जनानां कृते उत्तमशिक्षा, स्वास्थ्यसेवा च प्रदातुं कार्यं कुर्वन् अस्ति। जनानां कृते उत्तमाः समये च चिकित्सासुविधाः प्रदातुं शीघ्रमेव आईजीएमसी शिमला तथा टाण्डा चिकित्सा महाविद्यालये पीईटी स्कैन यन्त्राणि उपलभ्यन्ते। सः अवदत् यत् आवश्यकतायुतानां जल- विद्युत्- अनुदानं निरन्तरं भविष्यति, गृहनिर्माणाय अपि साहाय्यम् अपि प्रदत्तं भविष्यति। सः अवदत् यत् समाजस्य सम्पन्नपरिवाराः स्वेच्छया अनुदानं त्यक्तुं प्रोत्साहिताः सन्ति, एतावता १५०० जनाः विद्युत् अनुदानं त्यक्तवन्तः।

# Shimla News: लोकेन्द्रमोहनचन्देलः महाकुम्भे भोजनव्यवस्थायै ५०.२ लक्षरुप्यकाणि अददत्



हिमसंस्कृतवार्ताः- शिमला। शिमलासमीपस्थस्य शोघीनगरस्य निवासी सुप्रसिद्धोद्यमी च लोकेन्द्रमोहनचन्देलः उत्तरप्रदेशस्य प्रयागराजे आयोजितस्य पवित्रमहाकुम्भस्य सम्मानस्य चिह्नरूपेण तीर्थयात्रिकाणां भोजनस्य व्यवस्थापनार्थं ५०.२ लक्षरूप्यकाणां दानं कृतवान्। राज्यपालाः शिवप्रतापशुक्लः इत्यस्मै चेकमाध्यमेन राशिं समर्पयन् तेन एतदर्थं धनसङ्ग्रहे सहकार्यस्य अनुरोधः कृतः। एतदतिरिक्तं लोकेन्द्रमोहनचन्देलः हिमाचलप्रदेशस्य उत्तरप्रदेशस्य च मुख्यमन्त्री आश्रयकोषाय २.०५ लक्षरूप्यकाणि प्रधानमन्त्रि- आश्रयकोषाय २.०५ लक्षरूप्यकाणि च दानं कृतवन्तौ। सः अत्र राजभवने राज्यपालस्य शिष्टाचारयात्रायाः समये एतद् धनं चैकमाध्यमेन समर्पितवान्। शिमलावास्तव्य- समाजसेविभ्यां दीपकशर्मा, अखिलभारतीयशारस्वतपरिषदः उपाध्यक्षः गौरवशर्मा चेत्याभ्यां सह चन्देलः १४४ वर्षेषु एकवारं भवति अस्मिन् आध्यात्मिककार्यक्रमे सार्थकं योगदानं दातुम् इच्छां प्रकटितवान्। राज्यपालः लोकेन्द्रमोहनचन्देलस्य उदारतायाः समर्पणस्य च प्रशंसाम् अकरोत्, महाकुम्भस्य वैश्विक-आध्यात्मिक- सांस्कृतिकसमागमस्य महत्त्वै च बलं दत्तवान्। सः एतत् आयोजनं भारतस्य प्राचीनपरम्पराणां प्रतिबिम्बं, सार्वत्रिकसौहार्दस्य, मानवीयमूल्यानां च प्रतीकं इति वर्णितवान्। चन्देलमहोदयेन सह शिमलायाः समाजसेवी दीपकशर्मा, अखिल-भारतीय-शारस्वतपरिषदः अध्यक्षः गौरवशर्मा अपि उपस्थिताः आसन्। राज्यपालस्य सचिवः सी. पी. वर्मा अपि अस्मिन् अवसरे उपस्थितः आसीत्।

# सीबीआई संस्थया छात्रवृत्ति- अपराधस्य अभिलेखः स्वाधीने गृहीतः

हिमसंस्कृतवार्ताः शिमला। हिमाचलप्रदेशस्य बहुचर्चितं १८१ कोटि रुप्यकाणां छात्रवृत्ति-अपराधं सम्बन्धं सीबीआई (केन्द्रीय अन्वेषण ब्यूरो) तथा ईडी (प्रवर्तन निदेशालय) इत्येताभ्यां केन्द्रीय संस्थाभ्याम् अन्वेषणं प्रचलति। अस्मिन प्रकरणे चण्डीगढ़स्य सीबीआई कार्यालये शिमलायाः कार्यालयस्य डीएसपी अधिकारिणः अधिगृहीताः। उक्तं डीएसपी अधिकारीं अभियुक्तैः सह सम्पर्कं कृत्वा तेभ्यः प्राप्तम् उत्कोचधनं दशांशं कमीशनरूपेण याचना कर्तुं इत्यपवादः आरोपितः अस्ति। एवं च, ईडी संस्थायाः सहायकनिदेशकः विशालदीपः अपि धन-शोधनं सम्बन्धि प्रकरणे बन्धितः। तस्य ग्रहणानन्तरं ईडी पुनः अन्वेषणं कर्तुं प्रवृत्तम्। अस्य सम्बद्धं सम्पूर्णाभिलेखं चण्डीगढ़ सीबीआई कार्यालये शिमला कार्यालयात् अधिकारतः गृहीतम्। शिमला कार्यालयस्य पूर्वं डीएसपी इत्यस्य स्थानान्तरणस्य अनन्तरं, डीएसपी गोविन्दसिंहः सोलङ्की तत्र नियुक्तः कृतः। एवं च, प्रवर्तननिदेशालयस्य दिल्ली मुख्यालयेन अन्वेषणकार्यस्य दायित्वं शिमला उपकार्यालयस्य उपनिदेशकाय, मुख्यालयस्य संयुक्तनिदेशकाय च समर्पितम्। अस्मिन प्रकरणे शिमला कार्यालयस्य पूर्वं सहायकनिदेशकः प्रत्युपकारम् ग्रहीत इति आरोपेण पूर्वमेव बन्धितः अस्ति। सीबीआई संस्थया अभियुक्तेभ्यः अन्वेषणं प्रचलति यत् ईडी संस्थायाः पूर्वं सहायकनिदेशकः पदे स्थितः कालेऽपि अन्येभ्यः संस्थाभ्यः धनं किमपि याचितम् इति।सर्वं प्रकरणं सम्बन्धिनः अभियुक्तानाम् निजी शिक्षण संस्थानानां संचालनकर्तृभ्यः प्रत्युपकारम् ( रिश्वतं )सम्बन्धि आरोपेण ईडी संस्थायाः शिमला कार्यालये सम्पूर्णं कार्यबलं परिवर्तितं कृतम्। धनशोधनं सम्बन्धि द्वयोः प्रकरणयोः ऋणद्वय कोटि रूप्यकाणामुत्कोचं याचितं इति आरोपेण जनाः अचिन्तिताः जाताः। जनाः वदन्ति यत् यदा द्वे केन्द्रीय संस्थे एव एकस्मिन् अपराद्धेऽन्योन्ये आरोपान् कुर्वन्ति, तदा विश्वासस्य स्थानं कस्य इति प्रश्नः भवति ?

# पराक्रमदिवसस्य अवसरे सरदारपटेलविश्वविद्यालये मंडी इत्यत्र सुभाषचन्द्रबोसवर्यस्य सम्माने इतिहासविभागे राष्ट्रीयसंगोष्ठ्याः आयोजनम्



**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदारपटेलविश्वविद्यालयः मंडी इत्यस्य इतिहास सोसायटी- इतिहासविभागद्वारा 23 जनवरी 2025 दिनांके पराक्रमदिवसस्य अवसरे एकदिवसीया आभासीया राष्ट्रीयसंगोष्ठी आयोजिता। इदम् आयोजनं नेताजी सुभाषचंद्रबोसवर्यं समर्पितम्। अस्य उद्देश्यं देशस्य स्वतंत्रतासंग्रामे तेषां योगदानं स्मर्तुं, युवाछात्रान् प्रेरितान् करणमासीत्। संगोष्ठ्याः उद्घाटनं विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमारअवस्थीवर्येण कृतम्। सः बोसवर्यस्य विचारधारां, देशभक्तिं च प्रकाशितवान्। तेनोक्तं यत् सुभाषवर्यस्य जीवनं, विचाराश्च अद्यापि भारतीयेभ्यः प्रेरणास्रोतांसि सन्ति। पराक्रमदिवसः तेषां योगदानस्य स्मरणं कारयति, शिक्षयति च यत् स्वलक्ष्यस्य प्राप्तये साहसस्य दृढ़निश्चयस्य च कियती महत्ता वर्तते? मुख्यवक्ता आचार्यः संजयकुमारः प्राचार्यः राजकीय- महाविद्यालयः सतपुली उतराखंडः बोसवर्यस्य नेतृत्वस्य आजाद हिंद फौज इत्यस्य च महत्त्वे गहनचर्चाम् अकरोत्। तेनोक्तं यत् नेताजी सुभाषचन्द्रबोसः भारतीयस्वतंत्रतासंग्रामस्य महान् नेता, अद्वितीयः स्वतंत्रतासेनानी चासीत्। तेषां देशभक्तिः, साहसः कुशलनेतृत्वश्च इतिहासस्य आलोके तान् अमरम् अकरोत्। कार्यक्रमस्य अध्यक्षा आचार्या अनुपमा सिंहः स्वागतं कुर्वती उक्तवती यत् सुभाषवर्येण स्वजीवनेन संघर्षेण च संदेशः दत्तः यत् दृढ़संकल्पेन, बलिदानेन च किमपि लक्ष्यं प्राप्यते। संगोष्ठीसंयोजकः डॉ. राकेशकुमारशर्मा संगोष्ठ्याः उदेश्यानि प्रस्तुतवान्। तेनोक्तं यत् पराक्रमदिवसः भारते नेताजीसुभाषचंद्रबोसस्य जयंत्यवसरे (23 जनवरी) मान्यते अस्य आरम्भः 2021 तमे वर्षे भारतसरकारद्वारा कृतः। अस्य उद्देश्यं तेषाम् अद्वितीयसाहसस्य, देशभक्तेः स्वतंत्रता संग्रामे च तेषां योगदानस्य सम्मानमस्ति। संगोष्ठ्याम् अलीगढ- मुस्लिम- विश्वविद्यालयस्य आचार्यः परवेज नाजिरः, उतराखंडतः आचार्यः सराज मुहम्मदः, डॉ. नीरजः, डॉ. अर्जुनः, पटनातः डॉ. दिव्या, डॉ. मनीता यादवः, डॉ. मनवीरः, डॉ. पार्थ सार्थः, देशस्य अन्य विद्वान्सः, वेदः, सुरेखा, उत्सवसहितं शोधार्थिनः, इतिहास सोसायटी इत्यस्य अध्यक्षा करीमा, शुभमः, अनीषः, स्नातकोत्तरछात्राश्च भागं गृहीतवन्तः। संगोष्ठी संयोजकः डॉ. राकेशकुमारशर्मा सर्वेषां धन्यवादम् अकरोत्। प्रतिभागिनः अस्य आयोजनस्य सराहनाम् कृत्वा एतां प्रेरणादायिकाम् उक्तवन्तः।




# (४६९). यक्षः कः आसीत्?

sudha_sathaye@yahoo.com

यक्षाः पुरुषाः, तेषां स्त्रियः च यक्षिण्यः इत्युच्यन्ते। एते भूमौ निहितं गुप्तं निधिं (रक्ष्यमाणं धनं) संरक्षन्ति, अतः एते "निधिपतयः" इति नाम्ना अपि प्रसिद्धिः। यक्षाणां मध्ये कुबेरः प्रमुखः निधिपतिः भवति, यः देवानां निधेः रक्षकः अस्ति।

महाभारते कथ्यते यथा, पाण्डवाः द्वितीयवनवासकाले वनं भ्रमन्तः यक्षं प्राप्नुवन्। तेन यक्षेण युधिष्ठिरं प्रति प्रसिद्धं 'यक्षप्रश्नं' कृतम्।

उपनिषत्सु अपि वर्ण्यते यथा, यक्षः अग्निं, इन्द्रं, वरुणं, वायुम् च गर्वं चूर्णीकृतवान्। यक्षिणीसाधनायां अपि उल्लेखः अस्ति। पुराणेषु अष्टयक्षिण्यः चर्च्यन्ते। ताः प्रमुखा यक्षिण्यः एताः सन्ति -

१. सुरसुन्दरी यक्षिणी
२. मनोहारिणी यक्षिणी
३. कनकावती यक्षिणी
४. कामेश्वरी यक्षिणी
५. रतिप्रिया यक्षिणी
६. पद्मिनी यक्षिणी
७. नटी यक्षिणी
८. अनुरागिणी यक्षिणी।

## किन्नरजातिः

अद्यापि किन्नरजातीयाः हिमालये स्थिताः। विशेषतः ते नेपालसिक्किमप्रदेशयोः निवसन्ति। पुराणेषु वर्ण्यते यथा, किन्नरः हिमालयप्रदेशे वसन्तः मानुष्यजातिः अभवत्। तेषां मुख्यस्थानानि हिमवत् तथा हेमकूट इत्यादीनि। अद्यत्वे किन्नराः "किन्नौर" प्रदेशे निवसन्ति। ते कन्नौरी, गलचा, लाहौली इत्यादि भाषाः भाषन्ते। महापण्डितः राहुलः साङ्कृत्यायनः तं "प्राचीनं किन्नरदेशम्" इति प्रतिपाद्य, तत्र अनेका यात्राः कृतवान्। तेन लिखिताः 'किन्नरदेशः' तथा 'हिमाचलः' इत्येते ग्रन्थाः प्रसिद्धाः। महाभारते अर्जुनस्य किन्नरदेशे गमनं वर्ण्यते। अर्जुनः शापतः किन्नरः जातः। गन्धर्ववत् गायनवादने निपुणाः, सुमधुरभाषिण्यः, तथा अनुपमसौन्दर्ययुक्ताः किन्नर्यः प्राचीनकालात् प्रसिद्धाः। तासां रूपपरिवर्तनकला अद्भुता। हिन्दूतन्त्रग्रन्थेषु किन्नर्यः विशेषं स्थानं प्राप्नुवन्ति।

**किन्नर्याः षट् प्रसिद्धाः -**

१. मनोहारिणी किन्नरी
२ शुभग किन्नरी
३. विशालनेत्र किन्नरी
४. सुरतप्रिय किन्नरी
५. सुमुखी किन्नरी
६. दिवाकरमुखी किन्नरी। .... क्रमशः

**सुधा साठ्ये मुंबई।**

# कतिपयेषु क्षणेषु भविष्यति कर्करोगस्य चिकित्सा, स्विटजरलैण्डस्य वैज्ञानिकैः अल्ट्रा फास्ट् रेडियोथेरेपी इति विकसिता



हिमसंस्कृतवार्ताः। वैज्ञानिकाः एतादृशस्य आविष्कारस्य अतीव समीपस्था सन्ति येन सर्वप्रकारस्य कर्करोगस्य उन्मूलनार्थं साहाय्यं भविष्यति। एतेन शरीरस्य प्रत्येकं कोणात् कर्करोगकोशिकानां निराकरणं भविष्यति । स्विट्ज़र्ल्याण्ड्-देशस्य जिनेवा-नगरे कार्यं प्रचलति यदि सर्वं सम्यक् भवति तर्हि शीघ्रमेव कर्करोगिणां कृते अति-द्रुत-रेडियोथेरेपी-यन्त्रं उपलब्धं भविष्यति, यत् शरीरस्य अन्तः वर्धमानाः कर्करोग-कोशिकाः एकसेकेण्ड्-तः न्यूनेन समये मारयिष्यति |. एकस्य प्रतिवेदनस्य अनुसारं पारम्परिकरेडियोथेरेपी इत्यस्मात् इदं बहु द्रुततरं चिकित्सां भवति, तस्य समयः एकसेकेण्ड् इत्यस्मात् न्यूनः भवति । न केवलम् एतत्, तस्य दुष्प्रभावाः अपि अतीवाल्पाः सन्ति । स्विट्ज़र्ल्याण्ड्-देशस्य जिनेवा-नगरस्य बहिः स्थिते अस्यां विशालायां CERN-प्रयोगशालायां वैज्ञानिकाः रेडियोथेरेपी-यन्त्राणां नूतन-पीढयाः विकासे अग्रणीः सन्ति । आशास्ति यत् एतत् यन्त्रं सम्पूर्णशरीरे प्रसृतस्य अत्यन्तं असाध्यमस्तिष्कस्य अर्बुदस्य, मेटास्टेटिककर्क्कटस्य च चिकित्सां सम्भवं कर्तुं शक्नोति। सम्प्रति यदा कर्करोगकोशिका स्वस्थानात् गच्छन्ति तदा ते अन्तः गभीरं प्रविशन्ति, रेडियोथेरेपी अपि तान् मारयितुं असफला भवति , परन्तु अस्मात् नूतनेन रेडियोथेरेपीयन्त्रेण उत्सर्जितः विकिरणः दूरस्थशरीरस्य अङ्गेषु प्रविष्टानां अपि कर्करोगकोशिकानां नाशं करिष्यति । वैज्ञानिकाः अस्य सिद्धान्तस्य अथवा तन्त्रस्य नाम FLASH इति कृतवन्तः । रेडियोथेरेपीजगति चिरकालात् अनुपलब्धाः अवधारणाः अपि फ्लैशः सम्बोधयति । एषः कर्करोगचिकित्सायाः सामान्यविधिषु अन्यतमः अस्ति, यत् सर्वेषां कर्करोगिणां द्वितीयतृतीयांशः चिकित्साकाले कस्मिन्चित् समये प्राप्स्यति ।

**हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्**

## *सामान्यज्ञानम्*

प्रश्नः 1. शहीद- वीर- नारायण- सिंह- इंटरनेशनल- क्रिकेट- क्रीडाङ्गणम् कुत्र अस्ति?
उत्तरम् : रायपुरे (छत्तीसगढ़)।
प्रश्नः 2. 'सांख्यकारिका' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'ईश्वरकृष्णः'।
प्रश्नः 3. 'गुरोः आदेशम्' इत्यस्य समस्त पदं किम्?
उत्तरम्- गुर्वादेशम्। (षष्ठीतत्पुरुषः)
प्रश्नः 4. 'हिमाचलम्' इत्यस्य सन्धि-विच्छेदं कुरुत-
उत्तरम्- 'हिम + आचलम्'।
प्रश्नः 5. कुत्र किलिमंजारो पर्वतः स्थितः?
उत्तरम् – ताञ्जानियादेशे।
प्रश्नः 6. एच- पी- सी- ए- क्रीडाङ्गणम् कुत्र अस्ति?
उत्तरम् : धर्मशाला (हिमाचल प्रदेशे)।
प्रश्नः 7. कृषिविश्वविद्यालयः कुत्र अस्ति?
उत्तरम्- पालमपुरम् (कांगड़ा हि.प्र.)

# ।। श्रीरामायणकथा।।

## उत्तरकाण्डम्! (षट्पञ्चाशत्तमः सर्गः) इलोपाख्यानम्। (तृतीयः खण्डः)

लक्ष्मणः भरतश्च किं पुरुषोत्पत्तिं श्रुत्वा जनेश्वरं रामम् आश्चर्यमिति अब्रूताम्। ततः धर्मात्मा रामः भूयः राज्ञः इलस्य कथामेताम् अकथयत्। ततः सर्वासु स्त्रीषु गतासु तां रूपसम्पन्नाम् इलाम् एकाकिनीं दृष्ट्वा ऋषिसत्तमः बुधः प्रहसन् वाक्यमब्रवीत् हे सुरुचिरानने! अहं सोमस्य सुदयितः सुतः , त्वं मां भक्त्या भजस्व, स्निग्धेन चक्षुषा च पश्य। तस्य तद्वचनं श्रुत्वा तस्मिन् शून्ये स्वजनवर्जिते वने इला महाप्रभं प्रत्यब्रवीत् हे सौम्य! अहं कामचरी तव वशवर्तिनी अस्मि। हे सोमसुत! मां प्रशाधि, यथा च इच्छसि तथा कुरु।

तस्याः तदद्भुतं वचः श्रुत्वा हर्षमुपागतः सोमसुतः बुधः तया सह रमते स्म। एवमेव इलया सह रमणं कुर्वतः तस्य बुधस्य क्षणवद् वसन्तकालः गतः।अथ मासे सम्पूर्णे सः कर्दमात्मजः राजा इलः शयनात् जागरितः भूत्वा सलिलाशये तपन्तं निरालम्बम् ऊर्ध्वबाहुं तं सोमात्मजं दृष्ट्वा अभाषत भगवन्! पर्वतं दुर्गं सहानुगः अहं प्रविष्टः अस्मि, किन्तु तत् सैन्यं न पश्यामि! ते मामकाः क्व गताः? तस्य राजर्षेः तद्वचनं श्रुत्वा बुधः तं सान्त्वयन् शुभं वाक्यमब्रवीत् हे राजन्! महता अश्मवर्षेण तव भृत्याः विनिपातिताः। त्वं च वातवर्षभयार्दितः अस्मिन् आश्रमपदे सुप्तः आसीः। हे वीर! तव मङ्गलं भवतु। त्वम् आश्वस्तः भूत्वा निर्भयः विगतज्वरः फलमूलानि अशित्वा यथासुखम् इह निवस। सोमसुतस्य तद्वाक्यं श्रुत्वा आश्वस्तः भृत्यजनक्षयात् दीनः सः राजा इलः वाक्यं प्रत्यब्रवीत् हे ब्रह्मन्! भृत्यैर्विनाकृतोऽपि अहं स्वकं राज्यं न त्यक्ष्यामि। ततः क्षणमपि अत्राहं स्थातुं न इच्छामि।





हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

अतः माम् अनुज्ञातुम् अर्हसि। हे ब्रह्मन्! यदि अहं न गच्छामि तर्हि शशविन्दुरिति ख्यातः मम धर्मपरः ज्येष्ठपुत्रः मम राज्यं प्रपत्स्यते। अहं भृत्यदारान् सुखान्वितान् हित्वा स्थातुं न शक्ष्यामि। एवं ब्रुवति राजेन्द्रे बुधः सान्त्वपूर्वं परममद्भुतं वाक्यमब्रवीत् हे महाबल! त्वया सन्तापः न कार्यः। इह वासः रोचताम्। संवत्सरं यावत् अत्र वस, ततः अहं तव हितं कारयिष्यामि। अक्लिष्टकर्मणः बुधस्य तद्वचनं श्रुत्वा राजा इलः तदा तत्र वासाय मतिम् अकरोत्। एवमेव सः मासं स्त्री भूत्वा अनिशं रमयति स्म, पुनः मासं पुरुषभावेन धर्मबुद्धिं करोति स्म। ततः सा इला नवमे मासे पुत्रं पुरूरवसम् अजनयत्। जातमात्रं च सा इला तं पुत्रं पितुः हस्ते न्यवेशयत्। सा इला बुधस्य समवर्णं महाबलं पुत्रम् अजनयत्। ततः संवत्सरानन्तरं पुरुषीभूतं तं राजानं महात्मा बुधः धर्मयुक्ताभिः कथाभिः रमयति स्म।

# ॥ महाकुम्भभूमिः विभातीश्वरस्य ॥





-ईशान तिवारी, काशी

महासाधवो यत्र देवस्वरूपाः
महाज्ञानवन्तः सदाज्ञानशून्याः।
सदाकर्तुमेव स्वकर्म भ्रमन्ति
महाकुम्भभूमिर्विभातीश्वरस्य॥1॥

सदोत्थाय नित्यं व्रजन्ति प्रभाते
महासंगमे स्नातुमेव त्रिवेण्याः।
प्रयागेश्वरीणां नदीनां प्रसादात्
स्वपापालये धर्मलेपाय सन्तः॥2॥

यथा मन्दिरे सच्चिदानन्दवासः
विधीशस्य वासो विमुक्तिप्रदोऽस्ति
तथा कुम्भभूमौ प्रवासः स्वसाधोः
भवत्यानुरूपः प्रियः पापनाशः॥3॥

अहो कुम्भदेशे विदेशाज्जनास्ते
समागत्य धर्मोपदेशं पठन्ति।
समं साधुना रामरामेति भक्त्या
परित्यज्य चिन्तां सभावं रटन्ति॥4॥

प्रभूमेशनाम्ना सुगीतं सुगीतं
कवीन्द्रैर्मुनिन्द्रैर्महेन्द्रैर्मनेन्द्रैः।
धरेन्द्रैः स्वधर्माज्जितार्थस्य शक्त्या
करोतीशभक्तस्य सेवां स्वभक्त्या॥5॥

विना लाभलोभं सुभोगं स्वमोहं
जनः स्वार्थसिद्धिं प्रसिद्धं स्ववृद्धिम्।
स्वशक्त्या स्वभक्त्या स्वगत्या
स्वमत्या
स्वराष्ट्रे विकासाय यज्ञं विधत्ते॥6॥

सुरक्षा स्वरक्षा विवक्षास्ति यस्याः
कृते वर्तते कोऽपि भिन्नो न तस्याः।
प्रसिद्धप्रयागे स्वशस्त्रैः स्वसेना
सदा भारतं रक्षतीयं विशिष्टा॥7॥

नगेन्द्रेन्द्रभक्ताः समस्ताः प्रसिद्धाः
न नागेन्द्रभिन्नाः न खिन्नाः
विभिन्नाः ।
तपस्याबलेनात्मतापस्य नाशं
प्रयागप्रदेशे पवित्रे करोति ॥ 8 ॥

परं पुण्यदेशस्य पुण्यात्मसिद्धाः
महान्तो महन्तो मनोज्ञाः प्रशान्ताः।
विराजन्त एतैः स्वदेशस्य शोभा
सदा वर्धिता वर्धमाना सदैव ॥9॥

कविनौति भक्त्या प्रयागप्रदेशं
परं पुण्यदं पापनाशं विशेषम् ।
अशेषार्थसिद्धिर्भवेज्जनमनीश!
मुदेशानबालो भणत्येव देव! ॥10॥

# आत्मौपम्यभावः



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

यः अहम्, अपरः सः अपि मादृशः एव। मयि स्थितः सुखदुःखादिभावः यथा, तथैव तस्मिन्नपि सः भावः समानः एव। एतादृशः भावः आत्मौपम्यभावः कथ्यते। जगति प्रत्येकं जनानां सुखं, दुःखं, लाभः, हानिः, जयः, पराजयः, रोगः, आरोग्यः इत्यादिभ्यः प्राप्तः अन्तःकरणस्थः अनुभवः समानः भवति। परेषां सुखदुःखादिकं यः आत्मनि अनुभवति स सत्पुरुषः कथ्यते। वस्तुतः स हि महात्मा आख्यायते, यः समस्तब्रह्माण्डे स्वकीयम् आत्मानं व्यापकं पश्यति। परन्तु एकदेशीयम्, अथवा शरीरे हि आत्मानं सीमिततया यः पश्यति स न महात्मा, अपितु अल्पात्मा उच्यते। एतादृशः अल्पात्मा पुरुषः, महात्मा इव समस्तप्राणिषु स्थितं सुखदुःखादिकम् अनुभवितुं न शक्नुयात्। तस्मिन् सहानुभूतिः, समवेदना इत्यादीनां महतां गुणानां नितराम् अभावः परिलक्ष्यते। समदर्शि-महापुरुषस्य विषये भगवता गीतायां प्रोक्तं यत्-

**'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।।'**

इति।

इयं समदर्शितायाः स्थितिः, अथवा समतायाः अनुभवो भगवत्कृपातो हि सम्भवति। एतादृशस्य समभावस्य प्राप्त्यर्थं भगवत्स्मरणपूर्वकं सुदृढा साधना कर्तव्या। भक्तिसिद्धान्तानुसारम्- यदि अखिल संसारं हि भगवत्स्वरूपं मत्वा जगतः सततं हितसेवा आचर्यते, तर्ह्यपि शनैः अन्तःकरणे समताभावस्य जागरणं सम्भवति। गोस्वामी तुलसीदासो न्यगदत्-

**'सो अनन्य जाके असि मति न टरै हनुमंत।**
**मैं सेवक सचराचर रूप स्वामी भगवंत।।'**

इति शुभम्।

# राष्ट्रेणाचरितः सुभाषचन्द्रबोस-वर्यस्य जन्मजयन्त्यावसरे 'पराक्रमदिवसः'

हिमसंस्कृतवार्ताः। नेताजी इत्युपाधिना विभूषितस्य सुभाषचन्द्रबोस-वर्यस्य जन्मजयन्त्यावसरे राष्ट्रेण 'पराक्रमदिवसः' आचरितः। अस्मिन् वर्षे, प्रथमवारं, भारतस्य अप्रतिम-नेतृषु अन्यतमस्य सुभाषचन्द्रबोस-वर्यस्य जन्मस्थाने, कटक-नगरस्य ऐतिहासिक-बाराबती-दुर्गे गतदिनात्समारभ्य दिनत्रयं यावत् 'पराक्रम-दिवसः' इत्युत्सवः आयोज्यते। सम्पूर्ण-देशात् बोस-वर्यस्य स्मृतयः आनीताः, कटक्-नगरस्य समारोह-स्थले प्रदर्शिताः च सन्ति। ललितकला-संस्थाने आयोजितायां प्रदर्शिन्यां बोस-वर्यस्य बहूनि सुन्दराणि बृहत्-चित्राणि अपि समाविष्टानि सन्ति। बोस-वर्यं, संस्मरता प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य सुभाषचन्द्रबोसवर्येण प्रेरितो भूत्वा विश्वस्य तृतीया बृहत्तमा-अर्थव्यवस्था भवितुं देशस्य प्रतिबद्धता पुनरुच्चारिता । बोस-वर्यस्य अष्टाविंशत्यधिकैकशततमे जन्मजयन्त्यावसरे दृश्य-सम्वाद- संदेशमाध्यमेन प्रधानमन्त्रिणा प्रोक्तं यत्, देशवासिभिः विकसितभारतस्य लक्ष्यं साधयितुं प्रयासः विधातव्यः । श्रीमोदी प्रोक्तवान् यत् जनाः स्वकीयं सौविध्यक्षेत्रं परित्यज्य बहिरागच्छेयुः अपि च सुभाषवर्येण सदृशं दक्षतायां ध्यानं प्रयच्छन्तः उत्कृष्टताम् आत्मगतं कुर्युः, येन देशस्य स्वतन्त्रतायै कष्टानि स्वीकृतानि ।
विश्वे देशस्य विवर्धमानामुन्नतिम् अधिकृत्य प्रधानमन्त्री अवदत् यत् देशस्य प्रगतिं प्रति अनुकूलं वातावरणम् अस्ति तथा च विश्वं भारतं प्रति अवलोकयति । अत्रान्तरे, राष्ट्रपतिः द्रौपदी मुर्मूवर्या, उपराष्ट्रपतिः जगदीप धनखडः, अनेके नेतारः च सुभाषचन्द्रबोसस्य जन्मजयन्त्यावसरे तस्मै श्रद्धाञ्जलिम् अर्पितवन्तः। सामाजिक-संदेशपटले राष्ट्रपतिवर्या अवदत् यत्, नेताजी भारतस्य स्वातन्त्र्य-सङ्ग्रामस्य दृढतमेषु प्रेरकव्यक्तिषु अन्यतमः अस्ति ।